श्री शारदा पंचरत्न स्तुतिः

श्री शारदा पंचरत्न स्तुतिः

श्रीमच्छंकरदेशिकेंद्ररचिते तुंगापगातीरगे
शृंगेर्याख्यपुरस्थिते सुविमले सन्मौनिसंसेविते |
पीठे तां रविकोटिदीप्तिसहितां राराज्यमानां शिवां
राजीवाक्षमुखामरार्चितपदां वंदे सदा शारदां || 1 ||

पादानम्रजनार्तिनाशनिपुणां नादानुसंधायिनीं
वेदांतप्रतिपाद्यमानविभवां वादादिशक्तिप्रदां |
विद्याकल्पलतां चतुर्मुखमुखांभोजातसूर्यायितां
विद्यातीर्थगुरूत्तमैरहरहः संसेव्यमानां भजे || 2 ||

ईषत्स्मेरमुखांबुजां कुचभरानम्रां त्रिलोकावनीं
दैत्यव्रातविनाशिनीं कचजितप्रावृट्पयोदां शिवं |
संसारार्णवमग्नदीनजनतासंतापसन्नाशिनीं
वंदे तां शुभदामनन्यशरणः स्वांते सदा शारदां || 3 ||

कारुण्यामृतवारिराशिमनिशं केयूरहारैर्वृतां
कामारेः सहजां कराब्जविलसत्कीरां कुबेरार्चितां |
कामक्रोधमुखारिवर्गशमनीं कैवल्यसंपत्प्रदां
कंजोद्भूतमनःप्रियां हृदि भजे भक्त्या सदा शारदां || 4 ||

नित्याऽनित्यविवेकदाननिपुणां स्तुत्यां मुकुंदादिभिः
यत्याकारशशांकमौळिविनुतां सत्यापितस्वाश्रवां |
नत्या केवलमेव तुष्टहृदयां त्यक्त्वाऽन्यदेवानहं
भक्त्या मे हृदयांबुजेऽनवरतं वंदे सदा शारदां || 5 ||

इति श्री शारदा पंचरत्न स्तुतिः |